# चन्द्रचूडालाष्टकम

## Chandrachoodaalaa Ashtakam

---

चन्द्रचूडाला अष्टकम

यमनियमाद्यङ्गयुतैर्योगैर्यत्पादपङ्कजं द्रष्टुम ।
प्रयतन्ते मुनिवर्यास्तमहं प्रणमामि चन्द्रचूडालम ॥१॥

यमगर्वभञ्जनचणं नमतां सर्वेष्टदानधौरेयम ।
शमदमसाधनसंपल्लभ्यं प्रणमामि चन्द्रचूडालम ॥२॥

यं द्रोणबिल्वमुख्यैः पूजयतां द्वारि मत्तमातङ्गाः ।
कण्ठे लसन्ति विद्यास्तमहं प्रणमामि चन्द्रचूडालम ॥३॥

नलिनभवपद्मनेत्रप्रमुखामरसेव्यमानपदपद्मम ।
नतजनविद्यादानप्रवणं प्रणमामि चन्द्रचूडालम ॥४॥

नुतिभिर्देववराणां मुखरीकृतमन्दिरद्वारम ।
स्तुतमादिमवाक्ततिभिः सततं प्रणमामि चन्द्रचूडालम ॥५॥

जन्तोस्तव पादपूजनकरणात्करपद्मगाः पुमर्थाः स्युः ।
मुरहरपूजितपादं तमहं प्रणमामि चन्द्रचूडालम ॥६॥

चेतसि चिन्तयतां यत्पदपद्मं सत्वरं वक्त्रात ।
निःसरति वाक्सुधामा तमहं प्रणमामि चन्द्रचूडालम ॥७॥

नम्राज्ञानतमस्ततिदूरीकरणाय नेत्रलक्ष्माद्यः ।
धत्तेऽग्निचन्द्रसूर्यास्तमहं प्रणमामि चन्द्रचूडालम ॥८॥

अष्टकमेतत्पठतां स्पष्टतरं कष्टनाशनं पुंसाम ।
अष्ट ददाति हि सिद्धीरिष्टसमष्टीश्च चन्द्रचूडालः ॥९॥

इति चन्द्रचूडालाष्टकं संपूर्णम ॥

**www.shaivam.org**

---